**This Question Paper consists of 41 questions and 8 printed pages.**
**अस्मिन् प्रश्नपत्रे 41 प्रश्नाः एवम् 8 मुद्रित पृष्ठाः सन्ति।**

**Roll No.** | | | | | | | | | | | | |
**अनुक्रमाङ्कः**

**Code No. 68/S/O/S**
**कूट सं.**
**Set/सेट - A**

# SANSKRIT
# संस्कृतम्
# (209)

**Day and Date of Examination**
**(परीक्षादिवसः दिनाङ्कश्च)** ______________________

**Signature of Invigilators** 1. ______________________
**(निरीक्षकयोः हस्ताक्षरम्)**
2. ______________________

**सामान्य अनुदेशाः :**

1 सर्वेषां प्रश्नानामुत्तराणि दत्तोत्तरपुस्तके एव लिखन्तु।
2 प्रश्नपत्रिकां पठितुं **15** निमेशाः दत्ताः। प्रश्नपत्रिका **02.15** मध्यह्ने समये दीयते। **02.15** समयतः **02.30** समयपर्यन्तं प्रश्नपत्रिकामेव छात्राः पठेयुः, एतस्मिन् समये उत्तरपत्रिकायां न किमपि उत्तरं लिखेयुः।
3 अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे अवश्यमेव लेखनीयः।
4 निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्नाः क्रमानुसारं सन्ति न वा इत्यपि निरीक्ष्यणीयम्।
5 वस्तुनिष्ठप्रश्नेषु (A), (B), (C) वा (D) विकल्पेषु किमपि एकम् उत्तरं चित्वा पृथक्रूपेण प्रदत्ते उत्तर–पुस्तिकामध्ये लिखेत्।
6 वस्तुनिष्ठप्रश्नसहितं सम्पूर्णप्रश्नपत्रस्य उत्तराणि निर्धारितसमये एव लेखनीयानि।
7 उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति।
8 स्व–उत्तरपुस्तिकायां प्रश्नपत्रस्य कूट (कोड) संख्या **68/S/O/S, Set/सेट - A** अवश्यमेव लेखनीया।

# SANSKRIT
# संस्कृतम्
# (209)

**समयः होरात्रयम् ]** **[ पूर्णाङ्काः – 100**

---

**निर्देशाः :**

**(1)** अस्मिन् प्रश्नपत्रे **[A]** भागे **20**, **[B]** भागे 7, **[C]** भागे **5**, **[D]** भागे **5**, **[E]** भागे **4** इति आहत्य **41** प्रश्नाः सन्ति।

**(2)** समे प्रश्ना अनिवार्याः। तत्र वैकल्पिकभागेषु एकः एव समाधेयः।

**(3)** प्रत्येकं प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति अङ्कान् दीयन्ते।

**(4)** **[A]** भागे प्र.सं. **1** तः **20** पर्यन्तं – बहुविकल्पप्रकारस्य प्रश्नाः **(MCQs)** येषु प्रत्येकम् एकः अङ्कः भवति। एतेषु प्रत्येकस्मिन् प्रश्ने दत्तचतुर्णां विकल्पानां मध्ये सर्वाधिकम् उपयुक्तं विकल्पं चित्वा लिखन्तु।

**(5)** **[B]** भागे प्र.सं. **21** तः **27** पर्यन्तम् – वस्तुनिष्ठप्रश्नाः। प्रत्येकं उपप्रश्नम् एकः अङ्कः अस्ति। ते यथानिर्देशं समाधेयाः।

**(6)** **[C]** भागे प्र.सं. **28** तः **32** पर्यन्तम् अतिलघूत्तरीयाः प्रश्नाः। प्रत्येकम् अङ्कद्वयात्मकाः सन्ति। ते यथानिर्देशं समाधेयाः।

**(7)** **[D]** भागे प्र.सं. **33** तः **37** पर्यन्तम् अनतिदीर्घोत्तरीयाः। प्रश्नाः। प्रत्येकम् चतुरङ्कात्मकाः सन्ति। ते यथानिर्देशं **50** तः **80** शब्दानां परिधिमध्ये समाधेयाः।

**(8)** **[E]** भागे प्र.सं. **38** तः **41** पर्यन्तम् दीर्घोत्तरीयाः प्रश्नाः प्रत्येकम् पञ्च अंकात्मकाः सन्ति। ते यथानिर्देशं **80** तः **100** शब्दानां परिधिमध्ये समाधेयाः।

**(9)** समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।

**(10)** स्वस्य उत्तरपत्रे प्रश्नपत्रस्य कूटसंख्या नूनं लेख्या।

**(11)** उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।

**(12)** समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।

**(13)** निरीक्ष्यताम् यत् प्रश्नपत्रस्य पुटसंख्या प्रश्नानां च संख्या प्रथमपुटस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।

**(14)** अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपुटे नूनं लेख्यः।

भाग – [A] विशति प्रश्नानां युक्तं विकल्पं चिनुत। 1×20=20

1 कतिविधं प्रीतिलक्षणम्?
(A) त्रिविधम् (B) पञ्चविधम्
(C) षड्विधम् (D) सप्तविधम्

2 के सत्पुरुषा इव?
(A) बकाः (B) वृक्षाः
(C) पशवः (D) पर्वताः

3 परस्परं विवदमानाः प्राणादयः कम् अपृच्छन्?
(A) प्रजापतिम् (B) साधुम्
(C) हरिम् (D) शिवम्

4 जलाशये कति मत्स्याः प्रतिवसन्ति स्म?
(A) त्रयः (B) चत्वारः
(C) पञ्च (D) षड्

5 अरक्षितं तिष्ठति दैवरक्षितम् इति कः उवाच?
(A) मत्स्यजीवी (B) अनागतविधाता
(C) प्रत्युत्पन्नमतिः (D) यद्भविष्यः

6 राघवः ऋष्यमूकसमीपे काम अब्रवीत्?
(A) सारथिम् (B) तापसीम्
(C) वैदेहीम् (D) शबरीम्

7 रावणेन पक्षिणां बली कः हतः?
(A) काकम् (B) जटायुम्
(C) मयूरम् (D) कपोतम्

8 का त्रिपथगानदी पूज्या?
(A) सरस्वती (B) नर्मदा
(C) गङ्गा (D) यमुना

9 पम्पातीरे काम् अपश्यत् रामः?
(A) शबरीम् (B) सीताम्
(C) शूर्पणखाम् (D) मृगीम्

10 वत्से! भर्तुः बहुमता भव इति कण्वः कां कथयति?
(A) गौतमीम् (B) शकुन्तलाम्
(C) प्रियंवदाम् (D) सखीम्

11 कस्य तपोवनं विरहकातरमभवत् ?

(A) कण्वस्य (B) विश्वामित्रस्य

(C) भारद्वाजस्य (D) वशिष्ठस्य

12 वातात् शीघ्रतरं किम् ?

(A) गृघ्रः (B) अश्वः

(C) मनः (D) बाणः

13 अनन्तकः व्याधिः कः ?

(A) लोभः (B) मोहः

(C) क्रोधः (D) ज्वरः

14 शक्रः रथस्य अग्रे शाल्मलीवृक्षे कानि पश्यति ?

(A) फलानि (B) गरुडनीडानि

(C) पत्राणि (D) पुष्पाणि

15 'करुणापरा हि साधवः' इति पाठः कस्मात् ग्रन्थात् गृहीतः ?

(A) कुमारसंभवम् (B) जातकमाला

(C) उत्तररामचरितम् (D) वाल्मीकिरामायणम्

16 'स्वस्ति' इत्यर्थे का विभक्तिः प्रयुज्यते ?

(A) तृतीया (B) चतुर्थी

(C) पंचमी (D) षष्ठी

17 'सर्वभूतानि' इत्यत्र कः समासः ?

(A) तत्पुरुषः (B) कर्मधारयः

(C) बहुब्रीहि (D) अव्ययीभावः

18 'श्रेयान्' इत्यत्र किं प्रातिपदिकम् ?

(A) श्रेयन् (B) श्रेयस्

(C) श्रेयम् (D) श्रियः

19 'वर्णयन्' इत्यत्र प्रकृति प्रत्ययौ कौ ?

(A) वर्ण+शतृ (B) वर्ण+यत्

(C) वरण+शतृ (D) वृणु+शतृ

20 इतस्तावत् इत्यत्र कः सन्धिच्छेदः –

(A) इतः+तावत् (B) इतस्+तत्

(C) इतस्त+वत् (D) इत+स्तावत्

भाग – [B]

**21** उचित विकल्पान् मेलयत **4×1=4**

| क स्तम्भः | ख स्तम्भः |
|---|---|
| माता | चित्रकूटः |
| पिता | गुरुतरा |
| बहुमत्स्यः | उच्चतरः |
| शैलेन्द्रः | ह्रदः |

**22** अधोलिखितेषु वाक्येषु सत्यम् असत्यंवेति लिखत– **4×1=4**

(i) वधिराः श्रोत्रेण अश्रृण्वन्तः जीवनं यापयन्ति।

(ii) क्रोधः सुलभः शत्रुः।

(iii) शैलेन्द्रः इत्यत्र षष्ठीतत्पुरुषः।

(iv) शरीरे प्राणाः सर्वश्रेष्ठाः सन्ति।

**23** उदाहरणमनुसृत्य अधोलिखित शब्दानां विभक्तिवचनं सहितं रूपं लिखत। **4×1=4**

| | शब्दः | विभक्ति | वचनम् | रूपम् |
|---|---|---|---|---|
| उदा. | श्याम | पञ्चमी | एकवचनम् | श्यामात् |
| (i) | वानर | षष्ठी | बहुवचनम् | |
| (ii) | पुस्तक | सप्तमी | बहुवचनम् | |
| (iii) | नर | पञ्चमी | बहुवचनम् | |
| (iv) | पुत्र | चतुर्थी | एकवचनम् | |

**24** उचितेन धातुरूपेण वाक्यपूर्तिं कुरुत (किमपिचतुष्टयम्) **4×1=4**

(i) वने एक शृगालः ______ स्म। (वस् – लट्)

(ii) नराः श्रमं कर्तुम् ______ (इच्छ् – लट्)

(iii) तौ मम गृहे ______ (निवस् – लट्)

(iv) वयम् प्राणैः ______ (जीव् – लट्)

(v) त्वं कठोर भाषणै तिरस्कर ______ (कृ – लट्)

25 सन्धिं सन्धिच्छेदं वा कृत्वा सन्धेः नामोल्लेखमपि कुरुत– **4×1=4**

(i) प्राण + आदयः ______

(ii) प्रति + उवाच ______

(iii) ______ + कालोऽपि

(iv) कश्चित् + एकः ______

26 अधोरेखांङ्कितपदमनुसृत्यं प्रश्ननिर्माणं कुरुत। **5×1=5**

(i) पुत्राः प्राणान् अणयन् सेवां कुर्वन्ति।

(ii) अतिथिः गृहात् अगच्छत्।

(iii) साधवः वपुषा परोपकारं कुर्वन्ति।

(iv) नद्यः तीव्रं वहन्ति।

(v) कृतप्रयत्नोऽपि गृहे विनश्यति।

27 अधोलिखितेषु प्रकृति प्रत्यय विभाजनं मेलनं वा प्रदर्शयत – **5×1=5**

(i) हन्+क्त्वा

(ii) खाद्+तुमुन्

(iii) पठ्+शतृ

(iv) गन्तव्यम्

(v) नत्वा

**भाग – [C]** पञ्च प्रश्नानां यथानिर्देशम् उत्तराणि लिखत – **2×5=10**

28 समुद्रतीरे फलैः शीतः कः वृक्षः आसीत?

29 भरद्वाजस्य आश्रमः कस्याः तीरे आसीत्?

30 तपसः किं लक्षणम् प्रोक्तम्?

**अथवा**

कैः सत्क्रियमाणः शक्रः स्वपुरम् अगच्छत्?

31 दौवारिकः कस्य आज्ञां शिरसा वहति?

32 सत्याग्रहाश्रमः कस्याः नद्याः तीरे अस्ति?

भाग – [D] पञ्च प्रश्नान् अनतिदीर्घोत्तरैः समाधत्त – 4×5=20

33 कस्मात् किं शिक्षेत्? इति पाठस्य सारांशं लिखत।

34 पाठानुसारं रामद्वारा सीतां प्रति वर्णितान् विशिष्ट प्रसङ्गान् वर्णयत।

35 किंस्विद् गुरुतरं भूमेः किंस्वित् प्रवसतोनिलंब।
इति श्लोकद्वये यक्षस्य प्रश्नानाम् युधिष्ठिर प्रदत्तोत्तराणि लिखत।

36 कर्तव्यनिष्ठा पाठानुसारं दौवारिकस्य भूमिकां वर्णयत।

37 यत्ते मध्यं पृथिवि यच्च नम्यं यास्त अर्पस्तन्वः सबभूणुः। इति श्लोकं **अथवा**
भूमिदानेन ये लोकाः गोदानेन च कीर्तिता। इति श्लोकं प्रपूर्य स्वभाषया भावार्थं लिखत।

**अथवा**

स्वपाठ्यपुस्तकात् स्मृतं किंचित् श्लोकद्वयं लिखत।

भाग – [E]

38 अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – 5

अस्माकं जीवने सत्यस्य मार्गः कल्याणकारकः अस्ति। यद्यपि सत्यस्य मार्गे चलनमति कठिनं भवति परन्तु जनं मानवं विधातुं मार्गः अयमेवास्ति। अमुं मार्ग मनुसृत्य जनः दयालुः, सहजः समाजस्य मानवानां च हितचिंतकः, दुर्गुणेभ्यः व्यसनेभ्यश्च दूरे तिष्ठति। एतादृशःजनः सर्वैः सह प्रीतिव्यवहारं करोति। एतादृशजनस्यजीवन मार्गे बहु विघ्नानि भवन्ति।

संसारे अज्ञानस्य अविद्यायाश्च साम्राज्यमस्ति। अतः सर्वं विहाय सत्यस्य रक्षा विधेया। सत्याचरणनिष्ठः जनः सुखकामनामूल्यजति। यः कोऽपि सत्यं त्यजति सः मानवतां त्यजति, भोगविलास–दुर्व्यसनैराक्रान्तः स्वस्यापरेषां व जीवनं कष्टपूर्ण विदधति।

(क) जीवने कल्याणकारकः मार्गः कः?

(ख) जनं मानवं विधातुं कः मार्गः अस्ति?

(ग) सत्यमार्गाश्रितस्य जनस्य व्यवहारः कीदृशः भवति?

(घ) संसारे कस्य साम्राज्यमस्ति?

(ङ) सर्वं विहाय कस्य रक्षा विधेया?

**39** एकम् विषयमधिकृत्य मंजूषासाहाय्येन दशसु वाक्येषु अनुच्छेदं लिखत। **5**

सन्तोषः

| **मञ्जूषा** |
|---|
| जगति, बहूनि, धनानि, सन्तोषः, श्रेष्ठं धनम्, सन्तोषे, सर्वं धनं, व्यर्थम्, सन्तोषः एव परं नियमम् |

**अथवा**

मम मित्रम्

| **मञ्जूषा** |
|---|
| सरलसमानः, मेधावी, क्रिकेटकीडकः, स्वस्थः, साहसी, परोपकारी, अनुशासनप्रियः, वाक्चतुरता, विपत्तौ सहायकः, मधुरभाषी |

**40** भवान् रमेशः, स्वज्येष्ठभ्रातुः विवाहमुपलक्ष्य परीक्षाकारणात् गन्तुमसमर्थः। अतः पत्र द्वारा शुभकामनासन्देशं प्रेषयतु – इति पत्रमेकं भ्रातरं प्रति लिखतु। **5**

**अथवा**

पाठ्यपुस्तक प्रेषणार्थं प्रकाशकं प्रति पत्रमेकं लिखतु।

**41** अधोलिखितं चित्रं दृष्ट्वा मंजूषा साहाय्येन दश वाक्यानि लिखत। **5**



| **मञ्जूषा** |
|---|
| देहल्यां, वासंतिकमेला आयोजिता, बहव, जनाः द्रष्टुं, विभिन्नेभ्यः स्थानेभ्यः – अहं पित्रा सह गतवान्, मिष्टान्नं, क्रीडनकम्, क्रीतम् आनन्दम्, अलभम् |